## ।। पंचत्रिंशोऽध्याय: ।। Chapter-35

ततो गच्छेन्नृपश्रेष्ठ न दूरे गौतमाश्रमात् ।।
यत्र वै जगतामार्या विद्यन्ते भक्तवत्सला: ।। १

तोषिताश्चण्डमुण्डाभ्याममर्थि हिया: सुरा ।।
विश्रुताश्चण्डमुण्डार्या इति नाम्ना जगत्त्रये ।। २

मान्धातोवाच :- श्रूयते निहतौ दैत्यौ चण्डमुण्डौ महासुरौ ।।
आराधिता: कथं ताभ्यामार्या: श्रीमालसंश्रया: ।।

एतत्कौतूहलं विप्र प्रसादान् मे निवेदय ।। ३

वसिष्ठ उवाच :- शृणु राजन्पुरा वृतं श्रीमाले श्रीमनोहरे ।।
यथा वै चाण्डमुण्डाभ्यां मातर: परितोषिता: ।। ४

शुम्भस्यानुचरौ पूर्व चण्डमुण्डौ महासुरौ ।।
देवीं गृहीतुमायातौ शुम्भार्थे बलदर्पितौ ।। ५

तौतस्मिन्निहतौ देव्या रणे रणविशारदौ ।।
पूनर्जातौ महीपीठेवनदग्धाविव द्रुमौ ।। ६

----

१ ए श्रयते (ए ५) गृहितु
२ ए मुण्डामैहासुरौ
३ ए तौतरि
४ ए रौ

दत्तवांश्चवनो ज्ञानी तयोर्ज्ञानं पुरातनं ।।
जातौ जातिस्मरौ दैत्यौ चण्डमुण्डौ दुरासदौ ।। ७

तावत् चिन्तयता-स्मैवं विविक्तै विहितासनौ ।।
पुराभूच्चण्डिकादेवी मृत्युकारणमावयोः ।। ८

अन्येषामपि दैत्यानां सैव हन्त्री भवे भवे ।।
ततस्तामेव चामुण्डामर्चयिष्यावहै चिरम्। ६

वरदामर्च्चयिष्यामो देवीममयमात्मनः ।।
वरै मयै तया दृष्ट्वा चारिष्यामो जगत्त्रयीम्। १०

इत्यालोच्य महीपाल चण्डमुण्डौ मदोत्कटौ ।।
श्रीमालं जग्मतुःतत्रौ तपस्तप्तुं छिन्नाकृती ।। ११

तत्र देवीः प्रतिष्ठाप्य शक्तिश्च सप्त सादरम् ।।
वाचंयमाभ्यां दैत्याभ्यां नीयन्ते वासराः किल।। १२

कन्दमूलफलाहारौ स्थण्डिलोत्सगशायिनौ ।।
जितव्रतौ जितात्मानौ देवीध्यानपरायणौ । १३

----

श्लोक

१ ए विविक्तैवि ( ए ४) तत्रदेव्यः प्रतिष्टाप्य श.तमः सप्त सादरं
२ ए मर्च्चपिष्या
३ ए चण्डमुण्डै

तयोस्तपस्यतोरेवं दैत्ययोर्दर्शने[१] नृप ।।
सम्वत्सरे भवज्जार्याः प्रत्यक्षा श्चण्डमुण्डयो ।। १४

दैव्युवाच :- युवाभ्यां किमिदं कष्ट क्रियते दैत्यपुगवौ ।।
तन्निवेदकतं सर्वं प्रदास्यामि युवोमहं[२] ।। १५

चण्डमूण्डावूचतु : :- प्रार्थयाव: सदा देवि त्वत्तो लोके महेश्वरि ।।
अभयं समरे यत्नादन्येषां भयदावपि ।। १६

अपिपापशताकीर्णौ लोकोद्वेगकरावपि ।।
न हन्तव्यौ त्वया देवि सुराणामाग्रहादपि ।। १७

रूपाणि तवयानीह भेदभिन्नानि भूतले ।।
माभूत्तेभ्यो भयं देवि प्रसादात्[३]तव नौ क्वचित् ।। १८

दैव्युवाच :- एवमस्तु महादैत्यौ नि:शकं चरतां भुवि ।।
अस्मत्कृतं भयं माभूद् युवयो: कामचारिणो: ।। १९

स्थास्यामो वयमप्यत्र श्रीमाले सिद्धिदे नृणाम् ।
संज्ञया चण्डमुण्डार्या भविष्यामो भुवि श्रुता:[४] ।। २०

----

१ बी दैत्ययोर्दर्शनेनृप, ई दैत्ययोर्दशनंनृप
४ ई श्रुतो ।
२ ए महं: ।। (ए ३) स्त

इह यै स्मान्नमिष्यन्ति नरा भक्तिपुरस्सरा: ।।
तुष्टास्तेभ्य: प्रदास्याम: सिद्धं सर्वार्थसाधिकाम् ।। २१

वसिष्ठउवाच :- इत्युक्त्वा मातर: सर्वा: सर्वालंकारभूषिता: ।।
तयोरदर्शनं प्राप्ता: पिशुनस्यैव सिद्धय: ।। २२

चण्डमुण्डावपि ततो बलोदग्रौ महासुरौ ।।
जग्मतुस्तौ यथाभीष्टं निर्भयौ भयदौ नृणाम् ।। २३

इत्येवं चण्डमुण्डाया मातरौ विश्रुता भुवि ।।
श्रीमाले सिद्धिदा: पुंसां दृश्यन्तेऽद्यापि मार्थिव ।। २४

सप्तम्यां ये नमिष्यन्ति कृतस्नाना: शरीरिण: ।।
सितायामसितायां वा नैतेषां स्यात् पराजय: ।। २५

----

इतिश्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म विभागे तृतीय परच्छेदे श्रीमालमहात्म्ये चण्डमुण्डायामाहात्म्यं नाम पंचस्त्रिंशोऽध्याय: ।। ३५ ।।

---

१ ई स्मातमिष्यन्ति

२ ए नतैषां